# संस्कृत-वार्ता:

दिनाङ्क :- 07.09.2024 सायम् - 06:20

**मुख्यवार्ता:**

- केन्द्रीयगृहमन्त्री अमितशाह: अद्य समाश्वासितवान् यत् विधानसभा-निर्वाचनानन्तरं जम्मूकश्मीरप्रदेशाय राज्यपदं प्रदास्यते।
- मणिपुरराज्ये भुशुण्डिकाप्रहारेषु षड्जना: मृत्युमुगता:।
- तेलङ्गानासर्वकारेण राज्यस्य त्रयस्त्रिंशत्सु एकोनत्रिंशत्-जनपदा: जलौघप्रभावित्वेन घोषिता:।
- अशेषे हि देशे अद्यारभ्य गणेशचतुर्थ्या: उत्सव: अतीव-हर्षोल्लासेन समारब्ध:। अवसरेऽस्मिन् राष्ट्रपति:, उपराष्ट्रपति:, प्रधानमन्त्री च देशवासिभ्य: शुभकामना: अयच्छन्।
- पेरिस-पैरालम्पिक-क्रीडाकुम्भस्य अवशिष्टे दिनद्वये भारतेन पदकानां संख्या त्रिंशत्यावत् कर्तुं प्रयतिष्यते।

**अमितशाह: जम्मू-कश्मीर:**

भाजपेतिदलस्य वरिष्ठनेता केन्द्रीयगृहमन्त्री च अमितशाह: अद्य समाश्वासितवान् यत् विधानसभा-निर्वाचनस्य अनन्तरं जम्मूकश्मीरप्रदेशाय राज्यपदं प्रदास्यते। जम्मूनगरे एकं सार्वजनिकोपवेशनं सम्बोधयन् श्रीशाह: स्पष्टीकृतवान् यत् जम्मूकश्मीरे आगामि-विधानसभा-निर्वाचनं ऐतिह्यत्वेनास्ति यतो हि मोदिप्रशासनद्वारा अनुच्छेदस्य सप्तत्यधिक-त्रिशतम् इत्येतस्य निरसनान्तरं प्रथमं वारं संविधानस्य अन्तर्गतं भवति इदं निर्वाचनम्। ध्येयं वर्तते यत् श्रीशाह: निर्वाचनप्रचाराय जम्मूकश्मीरस्य द्विदिवसीय-यात्रायामस्ति इति।

**मणिपुर-भुशुण्डिकाप्रहार:**

मणिपुरे विभिन्नस्थलेषु प्रात:कालादेव भुशुण्डिकाप्रहार: जायमान: अस्ति। एतस्मिन् प्रहारे षड्जना: मृत्युमुपगता: बहवश्च व्रणिता: समभवन्। अद्य प्रात: जिरीबामजनपदे कश्चन नागरिक: सुप्तावस्थायामेव मृत्युं प्राप्तवान्। आतंकवादिभि: पीडितस्य शिरसि भुशुण्डिकाघातो विहित:।

**तेलंगाना-वर्षा**

तेलङ्गाना-सर्वकारेण राज्यस्य त्रयस्त्रिंशत्सु एकोनत्रिंशत्-जनपदा: जलौघप्रभावित्वेन घोषिता:। जलौघप्रभावितेभ्य: जनपदेभ्य: त्रिकोटिरूप्यकाणामपि सहायता राज्यसर्वकारेण समुद्घोषिता। अत: पूर्वमपि चत्वार: जनपदा: जलौघप्रभावितत्वेन समुद्घोषिता: आसन्। जलौघप्रभावित-क्षेत्रेषु आपदुद्धार-कार्याणि जायमानानि सन्ति। रेवंथरेड्डी इत्यमुना हैदराबादे एकं उच्चस्तरीय-समीक्षोपवेशनमपि विहितम्। उपवेशनानन्तरं वार्ताहरै: सह संवादे राज्यस्य मुख्यसचिवेन शान्ता-कुमारी इत्यनया प्रोक्तं यत् गतमासस्य एकत्रिंशद्दिनांकात् आरभ्य अस्य मासस्य त्रिदिनांकं यावत् समिङ्कत-वर्षाया: आधारेण इयं घोषणा कृता तया अग्रे प्रोदीरितं यत् राज्ये वर्षाकारणात् मृतकानां संख्या संवर्ध्य एकोनत्रिंशत् समभवत्। राज्यसर्वकारेण हाने: अपेक्षित-प्रारूप-निर्माणार्थं जनपदस्तरीय: विशेषाधिकारी अपि नियोजित:।

**राष्ट्रपति:, प्रधानमंत्री-गणेशचतुर्थी**

अशेषे हि देशे अद्य गणेशचतुर्थ्या: उत्सव: अतीव-श्रद्धया आमान्यते। अयं दिवस: भगवत: श्रीगणेशस्य जन्मदिवसस्य प्रतीक: अस्ति। अस्मिन् दिने जना: स्वगृहेषु भगवत: श्रीगणेशस्य मृतिकया विनिर्मित-मूर्तिम् संस्थाप्य पूजयन्ति। राष्ट्रपति: द्रौपदी मुर्मु:, उपराष्ट्रपति: जगदीप धनखड:, प्रधानमन्त्री नरेन्द्र मोदी च असवरेऽस्मिन् जनेभ्य: शुभकामनां प्रदत्तवन्त:। राष्ट्रपति: द्रौपदीमुर्मु: सामाजिकान्तर्जालिक-सन्देशे प्रोक्तवती यत् अयमुत्सव: देशस्य विविधभागेषु सामूहिकोल्लासेन सह समायोज्यते सहैव अयमुत्सव: सामाजिकोर्जाया: सुन्दरम् उदाहरणमपि प्रस्तौति।

**प्रधानमन्त्री-शिक्षका:**

प्रधानमन्त्री नरेन्द्रमोदी प्रोक्तवान् यत् शिक्षका: राष्ट्राय विशिष्टसेवां प्रददति अपि च विकसितभारताय युवनिर्माणस्य कर्त्तव्यं तेषां हस्ते एव निहितमस्ति। ह्य: नवदिल्ल्यां निजावासे राष्ट्रिय-शिक्षक-पुरस्कार-प्राप्तै: शिक्षकै: सह सम्भाषमाण: श्रीमोदी व्यक्तीकृतवान् यत् विकसितभारताय योग्यनागरिकाणां यूनाञ्च निर्माणाय सर्वेषां सहयोग: अपेक्षितो वर्तते। श्रीमोदिना निगदितं यत् शिक्षका: भारतस्य विविधताया: अवलोकनाय विद्यार्थिन: पर्यटनाय आनयेयु:। प्रधानमन्त्री शिक्षकान् निवेदितवान् यत् ते निजछात्रान् प्रचल्यमानायां 'देखो अपना देश-पीपल्स च्वॉइस' इत्येतस्यां प्रतियोगितायां भाग्रग्रहणाय प्रेरणां ददतु।

**नड्डा-बिहार:**

केन्द्रीयस्वास्थ्यमन्त्री जे.पी.नड्डा अद्य पटनानगरे अत्याधुनिकस्य पटना-चिकित्सकीयमहाविद्यालयस्य चिकित्सालयस्य च निर्माणकार्याणि समीक्षितवान्। अयं हि विश्वस्य द्वितीयस्य बृहत्तमस्य चिकित्सालयस्य रूपेण विकसति। केन्द्रप्रशासनमपि अत्याधुनिक-सौविध्यै: सह चतु:पञ्चाशत् शय्यायुतस्य चिकित्सालस्य विकासाय बिहारप्रदेशाय साहाय्यं प्रददाति। एतदतिरिच्य श्रीनड्डा दरभङ्गा-मुजफ्फरपुरयो: द्वयो अत्याधुनिकसौविध्युतयो: चिकित्सालयोरपि उद्घाटनं विधास्यति। इत: पूर्वं श्रीनड्डा पटनानगरे तख्त-श्रीहरिमन्दिरसाहिब-इत्येतस्य भ्रमणं पूजार्चनां च कृतवान्।

**वैष्णव:-जापानदेश:**

केन्द्रीयसूचनाप्रसारण-मन्त्री अश्विनीवैष्णव: प्रतिपादितवान् यत् टोक्योनगरे जापान-एक्सटरनल-ट्रेड-ऑर्गनाइजेशन-इत्येतस्या: संस्थाया: अध्यक्षेण सुसुमु-**काटाओका** इत्यमुना साकं गुणवत्तायुतम् उपवेशनं सञ्जातम्। एकस्मिन् सामाजिक-सञ्चार-सन्देश-पटले श्रीवैष्णव: निगदितवान् यत् उपवेशनमिदम् द्विपक्षीय-व्यापार-निवेश-अर्थव्यवस्थापूरक-विषयेषु आधारितमासीत्।

**सैनिकविद्यालयस्य उद्घाटनम्**

उपराष्ट्रपतिः जगदीपधनखडः अद्य उत्तरप्रदेशस्य गोरखपुरे सैनिकविद्यालयस्य उद्घाटनम् विहितवान् । अस्मिन् अवसरे उपराष्ट्रपतिः उक्तवान् यत् शिक्षा एव माध्यम: अस्ति येन हि परिवर्तनम् आनयति तथा च शिक्षा एव समाजात् दुराचारान् च उन्मूलयति। असौ अवदत् यत् सः गोरखपुर-सैनिक-विद्यालयम् आगन्तुं हर्षितो वर्तते यतो हि सः स्वयमेव सैनिक-विद्यालयस्य चित्तौडगढ-इत्यस्य पूर्वविद्यार्थी अस्ति। अत्रावसरे उत्तरप्रदेशस्य मुख्यमन्त्री योगी-आदित्यनाथ: स्वस्यभाषणे उक्तवान् यत् समीपस्थे नेपाल-देशे, पश्चिम-बिहार-प्रदेशे, पूर्वांचल-प्रदेशे च निवसतां प्रायः त्रि-कोटि-जनानां कृते गोरखपुरम् शिक्षा-स्वास्थ्य-सौकर्याणां च केन्द्रम् अस्ति इति। अयं सैनिक-विद्यालयः अस्य प्रदेशस्य शैक्षणिक-परिदृश्ये अपि महत्त्वपूर्णां भूमिकां निर्वहति। अवधेयम् वर्तते यत् गोरखपुर -सैनिक-विद्यालयः पूर्वीय-उत्तरप्रदेशस्य प्रथमः सैनिक-विद्यालयः, उत्तरप्रदेश-सैनिक-विद्यालय-समाजेन सञ्चालितः द्वितीयः सैनिक-विद्यालयः च अस्ति।

**अपराजित-महिला-बाल -विधि-संशोधनम्**

पश्चिमवङ्गस्य राज्यपालः सी. वी. आनन्दबोसः अस्य वर्षस्य 'अपराजिता-महिला-बाल-पश्चिमवङ्गस्य आपराधिक-विधि-संशोधनम् विधेयकम्' इतीदं राष्ट्रपतये द्रौपदी-मुर्मू इत्यस्यै प्रेषितवान्, यस्मिन् अनेकाः न्यूनताः सन्ति इति सूचितवान् । गतमासस्य नवमे दिनाङ्के कोलकातायाः आर्. जि. कर-चिकित्सालये प्रशिक्षवः एकस्याः चिकित्सकायाः बलात्कारस्य, हत्यायाः च अनन्तरं राज्य-विधानसभया एतत् विधेयकं पारितम् । यदि बलात्कारस्य अपराधिणां क्रियायाः परिणामेन पीडितायाः मृत्युः भवति तर्हि तेषां कृते मृत्युदण्ड-विधयेत् इति विधेयकं प्रार्थयति। गतरात्रौ राज्यपालः सामाजिकमाध्यमेषु एकस्मिन् सन्देशे अलिखत् यत् विधेयकं त्वरितमेव निर्मितम् अस्ति इति।

**पैरालम्पिक प्रतिस्पर्धा**

पेरिस-पैरालम्पिक-क्रीडाकुम्भे भारतेन सप्तविंशतिः पदकानि अधिगतानि। येषु षड्सुवर्णपदकानि नवरजतपदकानि द्वादश च कांस्यपदकानि भारतस्य स्यूते अन्तर्निहितानि। अपरत्र नैके क्रीडका: विविधासु प्रतिस्पर्धासु द्वन्द्वाय तत्परा: सन्तीति।

**।। इति वार्ताः।।**